International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(6): 71-74
© 2026 IJMH
www.themultijournal.com

Received: 22-10-2026
Accepted: 07-11-2026
Publish : 09-11-2026

Menoka Barai
Research Schoolar,
Department of Education,
National Sanskrit University,
Tirupati

Correspondence:
Menoka Barai
Research Schoolar,
Department of Education,
National Sanskrit University,
Tirupati

नारीणां संरक्षणे भारतीय-आयोगेषु वर्णितानां नारीसुरक्षानियमानां योगदानम्

Menoka Barai

सारांशः (Abstract)

नारीणां सुरक्षा सम्मानः समानाधिकारः च भारतीयसंविधानस्य मूलभावेषु अन्तर्भवन्ति। भारतीयसमाजे नारीणां विरुद्धं हिंसा, लैङ्गिकभेदभावः, पणप्रथा, बालविवाहः, कार्यस्थले लैङ्गिकउत्पीडनम्, मानवव्यापारः, अन्तर्जालिकापराधाः इत्यादयः समस्याः अद्यापि विद्यन्ते। एतासां समस्याणां निराकरणाय भारतीयसंसदेन बहवः नारीसुरक्षानियमाः निर्मिताः, तेषां प्रभावी कार्यान्वयनाय राष्ट्रीयमहिला-आयोगः, राष्ट्रीयमानवाधिकार-आयोगः, राज्यमहिला-आयोगः इत्यादयः आयोगाः संस्थापिताः। अस्मिन् शोधपत्रे नारीसुरक्षासम्बद्धानां प्रमुखनियमानां स्वरूपं, भारतीय-आयोगानां भूमिका, तेषां योगदानं, वर्तमानकालिक-समस्या-समाधानोपायाः सम्यग्विश्लेषिताः सन्ति।

मुख्यशब्दाः— नारीसुरक्षा, भारतीय-आयोगाः, नारीसुरक्षानियमाः।

प्रस्तावना

भारतीयसंस्कृतौ नारीणां स्थानं परमपूज्यम्। *"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"* इति मनुस्मृतिवचनम् अस्य प्रमाणम्। तथापि आधुनिकसमाजे महिलानां प्रति प्रतिकूलापराधानां वृद्धिः चिन्ताजनका अस्ति। अतः महिलानां जीवनस्य सम्मानस्य स्वातन्त्र्यस्य च संरक्षणाय संविधाने विशेषप्रावधानानि कृतानि, विविधाः सुरक्षानियमाः निर्मिताः, तेषां पालनार्थं आयोगाश्च स्थापिताः।

1. नारीसुरक्षा

नारीसुरक्षा इति पदस्य अर्थः महिलानां जीवनस्य सम्मानस्य स्वातन्त्र्यस्य समानतायाः शारीरिक-मानसिक-आर्थिक-सामाजिक-अधिकाराणां च संरक्षणम्। नारीसुरक्षायाः उद्देश्यं महिलाभ्यः हिंसा, उत्पीडनम्, भेदभावः, शोषणम्, लैङ्गिक-अपराधाः, पणपीडा, बालविवाहः, मानव-तस्करी, कार्यस्थले उत्पीडनम् इत्यादिभ्यः रक्षणं कृत्वा तासां सुरक्षितं सम्मानपूर्णं न्याययुक्तं च जीवनं सुनिश्चितं कर्तुम् अस्ति।

❖ नारीसुरक्षायाः परिभाषा

1. **"यया व्यवस्थया महिलानां जीवनस्य सम्मानस्य, अधिकाराणां स्वातन्त्र्यस्य च संरक्षणं भवति, सा नारीसुरक्षा इति कथ्यते।"**
2. **"महिलानां शारीरिक-मानसिक-सामाजिक-आर्थिक-सुरक्षायाः तथा तासां मानवाधिकाराणां संरक्षणार्थं विधिभिः नीतिभिः सामाजिकोपायैः च कृतः समग्रः प्रयत्नः नारीसुरक्षा इति उच्यते।"**

❖ नारीसुरक्षायाः आवश्यकता

1. महिलानां जीवनस्य सम्मानस्य च संरक्षणाय।
2. हिंसा-उत्पीडनयोः निवारणाय।
3. समानाधिकारस्य स्थापनाय।
4. सामाजिकन्यायस्य संवर्धनाय।
5. महिला-सशक्तीकरणस्य प्रोत्साहनाय।
6. संविधानप्रदत्ताधिकाराणां रक्षणाय।
7. सुरक्षित-समाजस्य निर्माणाय।

8. राष्ट्रस्य सामाजिक-आर्थिक-विकासाय।

❖ **नारीसुरक्षायाः प्रमुखाः आयामाः**

• **शारीरिकसुरक्षा** – हिंसा, उत्पीडनम्, बलात्कारः, मानव-तस्करी इत्यादिभ्यः संरक्षणम्।

• **मानसिकसुरक्षा** – मानसिकपीडा, अपमानः, भयप्रदर्शनम् इत्यादेः निवारणम्।

• **सामाजिकसुरक्षा** – समानव्यवहारः, भेदभावस्य निवारणम्, सम्मानपूर्णजीवनम्।

• **आर्थिकसुरक्षा** – वृत्तिः, समानवेतनम्, आर्थिकस्वावलम्बनम्।

• **विधिकसुरक्षा** – संविधानेन विविधैः नारीसुरक्षानियमैः च प्रदत्तानामधिकाराणां संरक्षणम्।

नारीसुरक्षा केवलं महिलानां संरक्षणस्य विषयः नास्ति, अपितु न्यायपूर्णस्य समानतामूलकस्य प्रगतिशीलस्य च समाजस्य आधारः अस्ति। यदा महिलाः भयमुक्ताः, सम्मानिताः, स्वावलम्बिन्यः च भवन्ति, तदा एव राष्ट्रस्य समग्रविकासः सम्भवति। अतः शासनस्य, न्यायपालिकायाः शिक्षणसंस्थानां परिवारस्य समाजस्य च संयुक्तप्रयत्नैः नारीसुरक्षा सुदृढा कर्तव्या।

2. राष्ट्रीयमहिला-आयोगः

भारते महिलानां अधिकारसंरक्षणाय, समानतास्थापनाय, न्यायप्रदानाय सशक्तीकरणाय च राष्ट्रीयमहिला-आयोगः (National Commission for Women – NCW) इति वैधानिकसंस्था राष्ट्रीयमहिला-आयोग-अधिनियमेन, 1990 (National Commission for Women Act, 1990) स्थापितः। अस्य आयोगस्य कार्यारम्भः 1992 तमे वर्षे अभवत्। आयोगस्य प्रमुखलक्ष्यं महिलानां संवैधानिक-विधिक-अधिकाराणां संरक्षणं, नारीसुरक्षानियमानां प्रभावी-क्रियान्वयनं, महिला-सशक्तीकरणस्य संवर्धनम् च अस्ति। अतः भारते सुरक्षितं न्यायपूर्णं समानतामूलकं च समाजं निर्मातुं राष्ट्रीयमहिला-आयोगस्य योगदानम् अतुलनीयम् अस्ति।

3. राष्ट्रीयमानवाधिकार-आयोगः

भारते मानवाधिकारसंरक्षणस्य उद्देश्येन **राष्ट्रीयमानवाधिकार-आयोगः (National Human Rights Commission – NHRC)** 1993 तमे वर्षे **मानवाधिकारसंरक्षण-अधिनियमेन (Protection of Human Rights Act, 1993)** स्थापितः। अस्य आयोगस्य प्रमुखं उद्देश्यं सर्वेषां नागरिकानां मानवाधिकाराणां संरक्षणं संवर्धनञ्च अस्ति। स्त्रीणां मानवाधिकाराः अपि अस्य कार्यक्षेत्रस्य महत्त्वपूर्णः अंशः सन्ति। अतः आयोगः नारीसुरक्षासम्बद्ध-विधीनां प्रभावी-क्रियान्वयनाय मानवाधिकार-उल्लङ्घनस्य निवारणाय जनजागरणाय शासनाय परामर्शप्रदानाय च महत्त्वपूर्णं योगदानं ददाति।

4. राज्यमहिला-आयोगाः

भारते महिलानां अधिकारसंरक्षणाय तथा नारीसुरक्षानियमानां प्रभावी-क्रियान्वयनाय विभिन्नेषु राज्येषु **राज्यमहिला-आयोगाः (State Commissions for Women)** स्थापिताः सन्ति। एते आयोगाः स्वस्वराज्यस्य विधिनियमानुसारं कार्यं कुर्वन्ति तथा महिलानां संवैधानिक-विधिक-अधिकाराणां संरक्षणे, उत्पीडन-निवारणे, न्यायप्राप्तौ, जनजागरूकता, नारीसुरक्षानियमानां प्रभावी-क्रियान्वयनस्य, महिलानां अधिकारसंरक्षणस्य, जनजागरूकतायाः, अनुसन्धानस्य, विधिसंशोधनस्य, पीडितमहिलासहायतायाः महिला-सशक्तीकरणस्य च क्षेत्रे अत्यन्तं महत्त्वपूर्णं योगदानं वहन्ति। राज्यस्तरे महिलानां समस्याः शीघ्रं ज्ञातुं तासां समाधानं कर्तुं च राज्यमहिला-आयोगाः प्रभाविणः संस्थारूपेण कार्यं कुर्वन्ति। एते आयोगाः महिलानां न्यायप्राप्तिं सुलभां कुर्वन्ति तथा सुरक्षितस्य समानतामूलकस्य न्यायप्रधानस्य च समाजस्य निर्माणे महत्त्वपूर्णां भूमिकां निर्वहन्ति।

5. विविध-आयोगानां नारीसुरक्षानियमानां योगदानम्

भारते नारीणां अधिकाररक्षणं, सुरक्षा, समानता तथा न्यायसुलभता सुनिश्चितुं विविधैः आयोगैः महत्त्वपूर्णं योगदानं प्रदत्तम्। एते आयोगाः केवलं नीतिनिर्माणे एव न, अपितु नारीसुरक्षासम्बद्धानां अधिनियमानां प्रभावी कार्यान्वयने, जनजागरणे, अनुसन्धानकार्येषु, अभियोगानां निवारणे तथा शासनाय आवश्यकसुधारेसु अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति।

• **नारी-अधिकाराणां संरक्षणम्**

राष्ट्रीयमहिला-आयोगः महिलानां संवैधानिकाधिकाराणां तथा विधिकाधिकाराणां संरक्षणं करोति। आयोगः नारीणां विरुद्धं पक्षपातस्य हिंसायाः भेदभावस्य च निवारणाय प्रयत्नशीलः भवति।

• **नारीसुरक्षानियमानां क्रियान्वयनस्य निरीक्षणम्**

आयोगः गृहहिंसातः महिलानां संरक्षण-अधिनियमः, 2005; कार्यस्थले महिलानां लैङ्गिक-उत्पीडन-निवारण-अधिनियमः, 2013; पण-प्रतिषेध-अधिनियमः, 1961; बालविवाह-प्रतिषेध-अधिनियमः, 2006; भारतीयन्यायसंहितायाः सम्बन्धितविधानानि इत्यादीनां प्रभावी-क्रियान्वयनस्य निरीक्षणं करोति एवमेव शासनाय आवश्यकाः अनुशंसाः ददाति।

• **अभियोगानां निवारणम्**

महिलाभिः प्रस्तुतानां उत्पीडनं, हिंसा, भेदभावः, कार्यस्थल-उत्पीडनं, पणपीडा, गृहहिंसासम्बद्धानां प्रकरणानां आयोगः परीक्षणं करोति एवमेव तेषां समाधानाय सम्बन्धिताधिकारिणः निर्देशयति।

• **विधिसंशोधनस्य अनुशंसाः**

समाजस्य आवश्यकतानुसारं महिला-सुरक्षाविधिषु संशोधनार्थम् आयोगः केन्द्रसर्वकाराय अनुशंसाः समर्पयति। अनेकानां महिला-सुरक्षासम्बद्ध-विधीनां परिष्कारः आयोगस्य परामर्शैः प्रेरितः अभवत्।

• **विधिजागरूकतायाः प्रसारः**

आयोगः विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु सामाजिक-संस्थासु च विधिजागरूकता-कार्यक्रमान्, कार्यशालाः, परिसंवादान्, प्रशिक्षणशिबिराणि च आयोजयन्ति, येन महिलाः स्वकीयाधिकारान् ज्ञातुं समर्थाः भवन्ति।

• **अनुसन्धानस्य प्रोत्साहनम्**

महिलानां सामाजिक-शैक्षिक-आर्थिक-विधिकस्थितविषये आयोगः अनुसन्धानकार्याणि, सर्वेक्षणानि प्रकाशनानि च प्रोत्साहयति। एतेषां परिणामाः महिला-कल्याणनीतिनिर्माणे उपयोगिनः भवन्ति।

• पीडितमहिलानां सहायता

आयोगः पीडितमहिलाभ्यः विधिसहायतां परामर्शसेवां मनोवैज्ञानिकसहयोगम् आवश्यकतानुसारं आश्रयव्यवस्थां च उपलब्धां कर्तुं प्रयतते।

• शासनस्य परामर्शदाता

महिला-सुरक्षा, महिला-सशक्तीकरणम्, समानाधिकारः तथा लैङ्गिकन्यायः इत्यादिषु विषयेषु आयोगः केन्द्र-राज्य-सर्वकारयोः परामर्शदातृरूपेण कार्यं करोति।

• विशेषवर्गीयमहिलानां संरक्षणम्

अनुसूचितजाति-अनुसूचितजनजाति-अल्पसंख्यक-दिव्याङ्ग-वृद्ध-विधवा-परित्यक्ता आर्थिकदृष्ट्या दुर्बलमहिलानां समस्याः च आयोगः विशेषतया परीक्षते तथा तासां संरक्षणाय उपायान् अनुशंसति।

• महिला-सशक्तीकरणस्य संवर्धनम्

राष्ट्रीयमहिला-आयोगः शिक्षायाः, आर्थिकस्वावलम्बनस्य, कौशल-विकासस्य, नेतृत्वविकासस्य एवमेव सामाजिकसमानतायाः माध्यमेन महिलानां सशक्तीकरणं प्रोत्साहयति।

• मानवाधिकारसंरक्षणम्

आयोगः स्त्रीणां जीवनस्य समानतायाः गौरवस्य स्वातन्त्र्यस्य च अधिकारान् संरक्षति। यदि कस्याश्चित् महिलायाः मानवाधिकाराः उल्लङ्घिताः भवन्ति, तर्हि आयोगः तेषां विषयेषु संज्ञानं गृह्णाति तथा न्यायप्राप्त्यर्थं प्रयत्नं करोति।

• कारागार-महिलागृह-निरीक्षणम्

आयोगः कारागाराणि, नारीनिकेतनानि, संरक्षणगृहाणि तथा अन्यसंस्थाः निरीक्ष्य तत्र महिलानां सुरक्षा, स्वास्थ्यं, जीवनस्थितिः, मानवाधिकारपालनं च परीक्षते।

• जनजागरणम्

महिलानां संवैधानिकाधिकाराणां तथा नारीसुरक्षानियमानां विषये आयोगः प्रशिक्षण-कार्यक्रमान्, कार्यशालाः, परिसंवादान्, जनजागरण-अभियानानि च आयोजयन्ति।

• नीतिपरामर्शाः

आयोगः समये समये केन्द्र-राज्य-सर्वकारेभ्यः नारीसुरक्षासम्बद्ध-नीतिषु सुधारार्थम् अनुशंसाः समर्पयति। एतेषां माध्यमेन विधीनां प्रभावकारिता वर्धते।

• स्वयंसेवीसंस्थाभिः सह समन्वयः

आयोगः विभिन्नाभिः स्वयंसेवीसंस्थाभिः, महिला-सङ्घैः, शिक्षण-संस्थाभिः च साकं सहयोगं कृत्वा नारीसुरक्षाविषये जागरूकतां वर्धयति।

• अन्तर्राष्ट्रीयमानवाधिकारमानकानां पालनम्

संयुक्तराष्ट्रसङ्घस्य CEDAW, मानवाधिकार-सार्वभौम-घोषणा (UDHR) इत्यादीनां सिद्धान्तानुसारं भारते महिला-अधिकार-संरक्षणस्य उन्नत्यर्थं आयोगः शासनं मार्गदर्शयति।

• नीतिनिर्माणे सहयोगः

महिलानां कल्याणाय राज्यसरकारैः निर्मीयमाणानां योजनानां, कार्यक्रमाणां तथा नीतिनिर्माणस्य विषये आयोगः परामर्शं ददाति एवमेव आवश्यकानुगुणसंशोधनान् अनुशंसति।

उपर्युक्ताः आयोगाः भारते नारीसुरक्षानियमानां प्रभावी कार्यान्वयनस्य प्रमुखाः स्तम्भाः सन्ति। एते महिलानाम् अधिकारसंरक्षणं, न्यायप्राप्तिः, सामाजिकसमानता, विधिजागरूकता तथा सशक्तीकरणं च प्रोत्साहयन्ति। आयोगानां सक्रियसहभागितया नारीसुरक्षासम्बद्धानि अधिनियमानि अधिकं प्रभाविणि भवन्ति तथा समाजे महिलानां प्रति सुरक्षितं, सम्मानपूर्णं, न्यायसंगतं च वातावरणं निर्मीयते।

6. नारीसुरक्षानियमाः (महिलासुरक्षासम्बद्धाः प्रमुखाः भारतीय-नियमाः)

नारीसुरक्षानियमाः ते विधिनियमाः सन्ति ये नारीणां जीवनस्य, सम्मानस्य, स्वातन्त्र्यस्य, समानाधिकारस्य, सुरक्षायाश्च संरक्षणार्थं भारतसर्वकारेण निर्मिताः। एते नियमाः महिलानां विरुद्धं हिंसां शोषणं उत्पीडनं भेदभावं पणप्रथां बालविवाहं लैङ्गिकापराधान् च निवारयन्ति तथा न्यायप्राप्तौ साहाय्यं कुर्वन्ति।

प्रमुखाः नारीसुरक्षानियमाः

• पणनिषेधाधिनियमः, 1961 (Dowry Prohibition Act, 1961)

- पणग्रहणं पणदानं च निषिद्धम्।
- पणसम्बद्धापराधानां दण्डविधानम्।

• मातृत्वलाभाधिनियमः, 1961 (Maternity Benefit Act, 1961)

कार्यरतमहिलाभ्यः मातृत्वावकाशः तथा अन्ये लाभाः प्रदीयन्ते।

• समानपारिश्रमिकाधिनियमः, 1976 (Equal Remuneration Act, 1976)

समानकार्ये पुरुषाणां महिलानां च समानवेतनस्य व्यवस्था।

• सतीनिवारणाधिनियमः, 1987 (Commission of Sati (Prevention) Act, 1987)

सतीप्रथायाः पूर्णनिषेधः तथा कठोरदण्डव्यवस्था।

• गर्भाधानपूर्व-प्रसवपूर्वनिदानप्रविधिनियमनाधिनियमः, 1994 (PCPNDT Act, 1994)

लिङ्गनिर्धारणस्य तथा कन्याभ्रूणहत्यायाः निवारणम्।

• गृहहिंसायाः विरुद्धं महिलासंरक्षणाधिनियमः, 2005 (Protection of Women from Domestic Violence Act, 2005)

शारीरिक-मानसिक-आर्थिक-लैङ्गिकहिंसायाः विरुद्धं महिलानां संरक्षणम्।

• बालविवाहप्रतिषेधाधिनियमः, 2006 (Prohibition of Child Marriage Act, 2006)

बालविवाहस्य निषेधः तथा दण्डविधानम्।

- **कार्यस्थले महिलानां लैङ्गिकउत्पीडननिवारणाधिनियमः, 2013 (Sexual Harassment of Women at Workplace Act, 2013)**

कार्यस्थले महिलानां सम्मानपूर्णं सुरक्षितं च वातावरणं सुनिश्चितम्।

- **फौजदारीविधि (संशोधन) अधिनियमः, 2013 (Criminal Law Amendment Act, 2013)**

बलात्कारस्य, अम्लाक्रमणस्य (Acid Attack), पश्चादनुगमनस्य (Stalking), गुप्तदर्शनस्य (Voyeurism) च विरुद्धं कठोरदण्डाः।

- **मुस्लिममहिलाविवाहाधिकारसंरक्षणाधिनियमः,2019 (Muslim Women (Protection of Rights on Marriage) Act, 2019)**

त्रितलाकप्रथायाः निषेधः तथा मुस्लिममहिलानां अधिकार-संरक्षणम्।

नारीसुरक्षानियमाः भारतीयलोकतन्त्रस्य सामाजिकन्यायस्य च आधारस्तम्भाः सन्ति। एतेषां नियमानां प्रभावी पालनम् जनजागरूकता प्रशासनिकसहयोगः न्यायपालिकायाः सक्रियता च नारीणां सुरक्षा सम्मानं समानता च सुनिश्चितयन्ति। अतः प्रत्येकेन नागरिकेन एतेषां नियमानां ज्ञानं प्राप्तव्यं तथा तेषां पालनं कर्तव्यम्।

उपसंहारः

भारतीयसंविधानम्, नारीसुरक्षानियमाः भारतीय-आयोगाः च महिलानां अधिकारसंरक्षणे परस्परपूरकाः सन्ति। विशेषतः राष्ट्रीयमहिला-आयोगः महिलानां संरक्षणे अधिकारजागरणे विधिसंशोधनानुशंसासु शासनमार्गदर्शने च महत्त्वपूर्णां भूमिकां निर्वहति। तथापि सामाजिकपरिवर्तनं विधिजागरूकता प्रशास-निकदृढता त्वरितन्यायव्यवस्था च आवश्यकाः सन्ति। आयोगानां सुदृढीकरणेन प्रभावीविधिपालनेन सामाजिकसहकार्येण च नारीणां सुरक्षितं सम्मानपूर्णं समानतामूलकं च जीवनं सुनिश्चितं भवितुमर्हति।

सन्दर्भग्रन्थसूची

1. त्रिपाठी, एस्. सी., तथा विभा अरोरा। नारीणां बालकानाञ्च सम्बन्धिनः विधयः (Law Relating to Women and Children). पञ्चमसंस्करणम्। सेन्ट्रल लॉ एजेन्सी, २०१२।
2. राव, ममता। नारीणां बालकानाञ्च सम्बन्धिनः विधयः (Law Relating to Women and Children). ईस्टर्न बुक कम्पनी, २०१८।
3. अग्नेस्, फ्लाविया, सुधीरचन्द्रः, तथा मोन्मयी बसु। भारते नारीणां विधयः (Women and Law in India). ऑक्सफोर्ड विश्वविद्यालय-प्रकाशनम्, २०१६।
4. राष्ट्रीयमहिला-आयोगः। नारीणां सम्बन्धिनः विधयः (Laws Relating to Women). राष्ट्रीयमहिला-आयोगः, २०२३।
5. राष्ट्रीयमहिला-आयोगः। लिङ्गन्यायसम्मतानां विधानानां दिशि (Towards Gender-Just Laws). राष्ट्रीयमहिला-आयोगः, २००५।
6. https://www.drishtiias.com/hindi/daily-updates/daily-news-editorials/women-s-commissions-in-india
7. https://byjus.com/free-ias-prep/national-commission-women/
8. https://forumias.com/psir/psir-pyq/discuss-in-brief-the-role-of-the-national-commission-for-women-do-upsc-psir-2019-2104/